शास्त्री-I खण्ड साहित्यम्
अभिज्ञानशाकुन्तलम्

प्र० (1) - पद्यमिदम् व्याख्येयम् ।
ग्रीवा भङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोक महाकवि कालिदास प्रणीतस्य अभिज्ञान शाकुन्तलम् नाट्यशास्त्रस्य प्रथमाङ्कात् उद्धृतोऽस्ति ।
अस्मिन श्लोके रथारूढः सन् राजा दुष्यन्तः एकं हरिणमनुगच्छति । अत्र अत्यन्तं वेगेन धावतः हरिणस्य चेष्टाः वर्णयन् राजा दुष्यन्तः सारथिं कथयति ।

व्याख्या - पश्य, पश्चात् धावन्तं मम रथं ग्रीवाभंगं कृत्वा पश्यति, ग्रीवाभंगकारणेन पुनः पुनः आबद्धदृष्टिः, बाणपतनभयात् स्वस्य पश्चादर्धिकेन भागेन अग्रभागं प्रविष्ट इव तथा श्रमकारणात् विवृतमुखात् पततः तथा अर्धचर्वितान् दर्भान् मार्गे विकिरन् अयं हरिणः उच्चैः कूर्दनात् आकाशे अधिकं तथा भूमौ अल्पमेव धावति ।

Renu Devi
11/12/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

शास्त्री - II खण्ड साहित्यम्

रघुवंश चतुर्दश: सर्ग:

प्र०(1) - पद्य मिदम् व्याख्येयम् ।

तेनार्थवाँल्लोभपराङ्मुखेन तेन घनता विघ्नभयं क्रियावान् ।
तेनास लोकः पितृमान्विनेत्रा तेनैव शोकापनुदेन पुत्री ॥

उत्तरम् = प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश-महाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति ।

व्याख्या:- श्रीरामः निर्लोभ आसीत् अतः श्रीरामः प्रजासु कमपि करं न प्रारब्धवान् फलतः कतिपयैरहोभिः प्रजा धनधान्यसम्पन्ना अभवत् । तस्य राज्ये निर्विघ्नताऽऽसीत्, अतः सर्वे नागरिकाः प्रसन्नता पूर्वकं यज्ञादीनां धार्मिक कार्याणां सम्पादनं कुर्वन्तिस्म, सः सर्वान् सुष्ठुप्रकारेण अचालयत् अतः सर्वे तं पितृवद् अमन्यन्त तथा विपतिकाले सर्वेभ्यः, साहाय्यं प्रदत्तवान् अतः असौ रामः प्रजाभ्यः पुत्रोऽप्यासीत् ।

Renu Devi
11/12/20
राधा उमाकान्त सं० महाविद्यालय सुरवसेना
पूर्णिया

उपशास्त्री -प्रखण्ड साहित्यम् तृतीय - पत्रम्

रघुवंश महाकाव्यम्
द्वितीय: सर्ग:

प्र० (1) - सकीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितः रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके राजा दिलीपः वने सञ्चरन् लतासन्नगृहेषु वनाधिष्ठातृदेवताभिः गीयमानां निजां कीर्तिमाकर्णितवान् । तत्र पुनः सच्छिद्रैः वर्णैः वायुपूरणेन स्वनद्भिः वंशवाद्यस्य कार्यं स्वरदानरूपं समाचरितमिति भाव

व्याख्या :- सः = राजा दिलीपः, मारुतपूर्णरन्ध्रैः = वायुपूर्णच्छिद्रैः अतएव, कूजद्भिः = स्वनद्भिः, कीचकैः = वेणुविशेषैः, आपादितवंशकृत्यं = सम्पादितमुरलीवाद्यकार्यं यथा स्यात्तथा, कुञ्जेषु = लतागृहेषु, वनदेवताभिः = काननदेवीभिः, उच्चैः = तारस्वरम्, उद्गीयमानं = प्रस्तूयमानम्, स्वं = आत्मीयम्, यशः = कीर्तिम्, शुश्राव = श्रुतवान् ।

Renu Devi
11/12/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री-II खण्ड साहित्यम् तृतीय पत्रम् classmate

Date ______
Page ______

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

प्र० (1) – "किरातार्जुनीयम्" इत्यस्य व्युत्पत्तिः करणीया ?

उत्तरम् – किरातार्जुनीयम् - इत्यत्र द्वौ शब्दौ स्तः – "किरातश्च अर्जुनीयश्च अर्थात् किरातवेशधारिणं भगवन्तं शिवम् एवं तृतीयं पाण्डवम् अर्जुनमभिलक्ष्य कृतं काव्यं "किरातार्जुनीयम्" इत्यभिधीयते। पाण्डवानां वनवास समये यदा अर्जुनः महर्षेः व्यासस्य आदेशं प्राप्य पाशुपतः अस्त्रस्य प्राप्त्यर्थम् इन्द्रकीलपर्वतं गतवान् । तदा भगवान् शिवः किरातवेषमाधृत्य अर्जुनस्य वीरतायाः परीक्षार्थम् अर्जुनेन सार्धं युद्धमकरोत् । एषा एव अस्य महाकाव्यस्य प्रामुख्येन घटना अवर्तत अतः अस्य नाम धेयम् "किरातार्जुनीयम्" इति कृतम् । सर्वेषां सुविदितमस्ति यदर्जुनः महाभारतस्य सुप्रसिद्धः पात्रः अस्ति ।

Renu Devi
11/12/20

राधा उमाकान्त सं० महाविद्यालय खसेना,
पूर्णिया ।